# Shri Radhakrishna PradurbhavaH

# શ્રીરાધાકૃષ્ણપ્રાદુર્ભાવઃ

## Document Information

Text title : rAdhAkRRiShNaprAdurbhAvaH

File name : rAdhAkRRiShNaprAdurbhAvaH.itx

Category : devii, radha, krishna, devI

Location : doc_devii

Description-comments : sarasa stotrasangrahaH (Lucknow, 1909)

Latest update : August 22, 2010

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 22, 2020

*sanskritdocuments.org*

# શ્રીરાધાકૃષ્ણપ્રાદુર્ભાવઃ

શ્રીમતે રામાનુજાય નમઃ ।
શ્રીરાધાનટવરાભ્યાં નમઃ ।

નમસ્તસ્મૈ ભગવતે કૃષ્ણાયાકુણ્ઠમેધસે ।
નમો રાધાધરસુધાસિન્ધુનિત્યવિહારિણે ॥ ૧॥

રાધાકૃષ્ણસ્વરૂપાં વૈ કૃષ્ણરાધાસ્વરૂપિણમ્ ।
કાલાત્માનં નિકુઞ્જસ્થં ગુરુરૂપં સદા ભજે ॥ ૨॥

હરિણીં હારિણીં હ્રીણાં હરિતાં ચતુરક્રિયામ્ ।
કૌમારીં સતતં વન્દે તપ્તચામીકરપ્રભામ્ ॥ ૩॥

મુગ્ધાં સ્નિગ્ધાં વિદગ્ધાં ચાસન્દિગ્ધાં ચતુરક્રિયામ્ ।
વન્દે રણક્રિયાભાસા દેવર્ષિપ્રમુખાકૃતીઃ ॥ ૪॥

સિઞ્જન્નૂપુરપાદપદ્મયુગલાં હંસીગતિં બિભ્રતીં
    ચઞ્ચત્ખઞ્જનમઞ્જુલોચનયુગાં પીનોલ્લસત્કન્ધરામ્ ।
બિભ્રત્કાઞ્ચનકઙ્કણં દ્યુતિમિલત્પાણૌ ચલચ્ચામરં
    કુર્વાણાં હરિરાધિકોપરિ સદા શ્રીરઙ્ગદેવીં ભજે ॥ ૫॥

નવ્યાં નૂતનચીરધારણપરાં નીલપ્રભાં દ્યોતિતાં
    નીલેન્દીવરદીર્ઘસુન્દરદૃશાં નીલં નિરીક્ષદ્ઘનમ્ ।
વૃન્દારણ્યનિકુઞ્જવાસમુદિતં રાજીવનેત્રં હરિં
    ધ્યાયન્તી ધરણિ સ્થિરેણ મનસા શ્રીનવ્યવાસાં ભજે ॥ ૬॥

વચનેમૃતસાગરાયતીં ગમને મત્તસુરદ્વિપાયતીમ્ ।
હસને મલમૌક્તિકાયતીં સતતં શ્રીસખિવિશ્વમાં ભજે ॥ ૭॥

ઉત્તમાઙ્ગપરિરક્ષણસ્થિરામુત્તરોત્તરરસપ્રદાયનીમ્ ।
સ્વામિનીં પ્રણયપૂરનિર્ભરામુત્તમાં ચ શિરસાભિવાદયે ॥ ૮॥

નિજદાસવિલાસદાયિનીં નિજનાથૈકગુણૌઘગાયિનીમ્ ।
વયસા નયનેન્દુહાયિનીં સુવિલાસાં શિરસા નતોસ્મ્યહમ્ ॥ ૯॥

રસસાગરપારધોરણીં રસરૂપામૃતચન્દ્રતોરણીમ્ ।
સરસસ્મિતહાસ્યવાદિનીં સરસાં રાસકરીં ભજામહે ॥ ૧૦॥

મધુરાં મધુરપ્રભાષિણીં હરિરાધારતિરઙ્ગસાક્ષિણીમ્ ।
શશિકોટિવિકાસસુસ્મિતાં પ્રણમામિ પ્રણયાત્મનિ સ્થિતામ્ ॥ ૧૧॥

ભવતાપહરાં ભયાપહાં ભવપાથોધિતરીં દયાપરામ્ ।
દલિતામ્બુજનેત્રશાલિનીમતિભદ્રાં મનસા સ્મરે મુદા ॥ ૧૨॥

નિજવર્ગમધુવ્રતાવલીં કમનીયાઙ્ગુલિપલ્લવપ્રરૂઢામ્ ।
સ્વજનામલમાનસપ્રસૂતં પ્રિયપદ્માપદપઙ્કજં સ્મરામિ ॥ ૧૩॥

શ્યામાં શ્યામવયોન્વિતાં પરિલસન્નીલામ્બરં બિભ્રતીં
    આકર્ણાયતનેત્રપઙ્કજભરૈરાલસ્યમાતન્વતિમ્ ।
લીલાલોલમનઙ્ગરઙ્ગમધુરવ્યાપરભારાવહાં
    રાધાકૃષ્ણમુખારવિન્દમતુલં સઞ્ચિનયન્તીં ભજે ॥ ૧૪॥

વીણાવાદનતારતાનમધુરત્વાવિષ્કરત્રીં મુદાં
    શ્રીવૃન્દાવનચન્દ્રકૃષ્ણવિલસત્પાદામ્બુજધ્યાયિનીમ્ ।
રાધાહારવિલાસભારકુશલાં કુન્દેન્દુજ્યોત્સ્નામુખા-
    મિચ્છાશક્તિરતાં હરેઃ પ્રિવતરાં શ્રીશારદામ્બાં ભજે ॥ ૧૫॥

કરેણોત્ત્રીયં હસન્તી દધાના દ્વિતીયેન કુલ્લારવિન્દાન્વહન્તી ।
લસત્પીનવક્ષો લસત્પુષ્પહારાં સદા સંસ્મરેહં કૃપાલામુદારામ્ ॥ ૧૬॥

રણચ્ચારુપાદામ્બુજન્યાસનિર્જિદ્વજેન્દ્રામુરૌ મૌક્તિકસ્ફારહારામ્ ।
સુધામાધુરીહારિમન્દસ્મિતાસ્યાં ભજે દેવદેવીં સુરપ્રાર્થ્યદાસ્યામ્ ॥ ૧૭॥

સ્ફુરત્સુન્દરોદારમન્દારહારસ્તનદ્વન્દ્વભારાવસીદત્સુમધ્યામ્ ।
લસદ્ધસ્તવિન્યસ્તતામ્બૂલપત્રાં ભજે સુન્દરીં સુન્દરાકારછત્રામ્ ॥ ૧૮॥

પાદારવિન્દં શિથિલં દધાના પદ્માલયા પદ્મપરાગરઞ્જિતા ।
પદ્મપ્રભા પદ્મકુચાભિરામા નમામિ તસ્યાઃ પદપઙ્કજં સદા ॥ ૧૯॥

અનાપ્નુવંસ્તન્મુખચન્દ્રમસ્તુલાં વિધુર્ગતઃ ખં ત્રપયા જ્વરાર્દિતઃ ।
જલે પતન્નાપ્તમુખામ્બુજશ્રીસ્તામિન્દિરાં ચેતસિ ભાવયામિ ॥ ૨૦॥

કામાઙ્ગનાકોટિમનોજ્ઞરૂપાં મુખપ્રભાનીર્જિતરાત્રિભૂપામ્ ।
સ્વીયપ્રિયાસ્નેહનિધાનકૂપાં રામાં સ્મરે કૃષ્ણમનોનુરૂપામ્ ॥ ૨૧॥

પ્રાવૃટ્ પ્રફુલ્લનવચારુકદમ્બપુષ્પહારામુખદ્યુતિવિનિર્જિતચન્દ્રવારા ।
કાન્તાઙ્ગસઙ્ગજનિતાઙ્કુનિદર્શનાય વામા કરોદભિલસન્મુકુરસ્વસખ્યાઃ ॥ ૨૨॥

કૃષ્ણામહમભિવન્દે યુગલપદામ્ભોજભાવનામુદિતામ્ ।
કૃષ્ણરસાયનતૃટમિ સાક્ષાદિવ સિન્ધુજાં કૃમામ્ ॥ ૨૩॥

યમુનાતીરનિકુઞ્જે મધુકરપુઞ્જે વિનિદ્રતરુવૃન્દે ।
પદ્મામહમભિબન્દે રટતીં કૃષ્ણેતિ કૃષ્ણેતિ ॥ ૨૪॥

અયુતાયુતેન્દુરૂપાં સકલસખીમાલિકાનૂપામ્ ।
વન્દેહં શ્રુતિરૂપાં કોટિસ્મરકાન્તિસરૂપામ્ ॥ ૨૫॥

મદનમોહનમોહનસુન્દરસ્મિતવિલાસકલાસુ કુતૂહલામ્ ।
પ્રમુદિતેન હૃદા ત્વભિવાદયે મનસિ ભાગવતીં ભગવત્પ્રિયામ્ ॥ ૨૬॥

વસન્તકાલોદયપુષ્પિતાનિ દ્વિસન્ધિરાગાયુતપઙ્કજાનિ ।
પ્રિયપ્રિયાચારુપદામ્બુજેષુ પ્રીત્યાર્પયન્તીં પ્રણમામિ માધવીમ્ ॥ ૨૭॥

યચ્છોભાભરજલધૌ વિધિમુખવિબુધાલયં યયુઃ સુચિરમ્ ।
અસિતાયાશ્ચ તદાસ્યં શારદવિધુમણ્ડલાકૃતિં ધ્યાયે ॥ ૨૮॥

શ‍ૃઙ્ગારભારં વિવિધં વિધાય પ્રાતઃ સ્થિતાયા નિજદેવતાયાઃ ।
મુખારવિન્દૈકનિરીક્ષણાય ગુણાકરી દર્પણમાચકાર ॥ ૨૯॥

દ્વિજરાજકલાવિરજમાનાં મુખશોભાજિતફુલ્લકઞ્જલક્ષ્મીમ્ ।
મૃગરાજકટિં મૃગાયતાક્ષીમહમીડે સતતં સુવલ્લભાખ્યામ્ ॥ ૩૦॥

શારદીયવિધુબિમ્બમુખાભાં કુન્દપઙ્ક્તિરદનશ્રિયમેકામ્ ।
તુઙ્ગપીનકુચભારવિનમ્રામાનતોઽસ્મિ શાશિગૌરતરાઙ્ગીમ્ ॥ ૩૧॥

મયૂરપિચ્છદ્યુતિહારચામરપ્રભાતિરસ્કારિ નિજપ્રિયાયાઃ ।
સઙ્ગુમ્ફયન્તીં વિલસત્કરાભ્યાં ધમ્મિલ્લભારં પ્રણમામિ કેશીમ્ ॥ ૩૨॥

જગત્પવિત્રં કુરુતે હિ યસ્યા દૃગન્તપાતો વિતનોતિ સૌખ્યમ્ ।
શ્રીસ્વામિની સ્નેહનિધાનભૂતાં શ્રીકૃષ્ણમિત્રાં પ્રભજે પવિત્રામ્ ॥ ૩૩॥

કાશ્મીરપઙ્કાઙ્કિતહૃત્સરોજાં સમ્ભાવિતશ્રીપતિપત્સરોજામ્ ।
વિનિદ્રરક્તોત્પલલોચનાભાં મુદા સ્મરે ચેતસિ કુઙ્કુમાભામ્ ॥ ૩૪॥

સમસ્તનાનાવિધદેવતાગણૈર્વિરિઞ્ચિગઙ્ગાધરશારદાદિભિઃ ।
મૂર્ધ્નાભિવન્દ્યારુણપાદપદ્માં શ્રીશ્રીહિતાં સન્તતમાનતોઽસ્મિ ॥ ૩૫॥

વિલોહિતપ્રાન્તવિશાલલોચનાં મુખપ્રભાપૂર્ણનિશાકરોપમામ્ ।
સુચામરાલઙ્કૃતહસ્તપઙ્કજાં શ્રીરઙ્ગદેવીં મનસા સ્મરામિ તામ્ ॥ ૩૬॥

અલિન્દે કાલિન્દીકમલસુરભીકુઞ્જવસતૌ
 વસન્તી વાસન્તી નવપરિમલોદ્ગારિવિદનામ્ ।
તદુત્તુઙ્ગે લીલામદમુકુલિતાક્ષીં પુનરિમાં
 કદાહં સેવ્યંસે કિસલયકલાપપ્રમદને ॥ ૩૭॥

શ્યામાલિઙ્ગિતગૌરદેહલતયા વિદ્યુચ્છવિં નિન્દતીં
 શ્યામામ્ભોધરમાધુરીપરિણતીં પદ્ભયાં તિરસ્કુર્વતીમ્ ।
સર્વાસાં રતિકેલિભાવચતુરાં સ્ત્રીણાં શિરોભૂષણાં
 શ્રીકૃષ્ણસ્મરમન્ત્રદેશનગુરું તાં રાધિકામાશ્રયે ॥ ૩૮॥

શ્યામપ્રેમવિલાસનીતિનિપુણા શ‍ૃઙ્ગારભાવાન્વિતા
 વૈદગ્ધીમદમઞ્જતીરસમયી લાવણ્યવિશ્રામભૂઃ ।
રાસોલ્લાસરસપ્રબન્ધરસિકા સૌન્દર્યસીમાશ્રયા
 શ્રીવૃન્દાવનદેવતા વિજયતે રાધા સુધામઞ્જરી ॥ ૩૯॥

શ્રીશ્રીકોટિનિતાન્તરૂપરુચિરાં સૌન્દર્યસમ્મોહિનીં
 શ્રીવૃદાવનમઞ્જુકુઞ્જનિભૃતિક્રીડરસાવેશિનીમ્ ।
શ્રીમદ્રાસવિલાસલાલસમહાનન્દામૃતપ્લાવિનીં
 શ્રીમદ્દુર્લભદુર્લભા વિજયતે રાધા સુધામઞ્જરી ॥ ૪૦॥

ઉત્તુઙ્ગસ્તનભારભઙ્ગુરતનુર્વિદ્યાચ્છટાકછવી
 પ્રોદ્યન્નીલનવામ્બરા મૃદુપદામ્ભોજસ્ફુરન્મઞ્જરી ।
સુસ્મેરાધરબિમ્બચન્દ્રવદની કન્દર્પદર્પાઙ્કુરા
 પ્રેમાબ્ધૌ મદમન્થરા વિજયતે પ્રાણાધિકા રાધિકા ॥ ૪૧॥

ભસ્મીભૂતમનોભવં હરદૃશોદારસ્ફુલિઙ્ગાઙ્કુરૈ-
 ર્લીલાપાઙ્ગનિરીક્ષણેન કુતુકા તત્સઞ્જયન્તી પુનઃ ।
મૃગ્યન્તી સ્મરકેલિકુઞ્જભવનેકાન્તં સખીભિઃ સમં
 નિત્યં નિત્યવિનોદિનાં વિજયતે પ્રાણાધિકા રાધિકા ॥ ૪૨॥

ઉન્મીલન્નવનેત્રપઙ્કજતરોઃ ફુલ્લસ્તનાલઙ્કૃતા
    સુશ્રોણીભરભઙ્ગુરા સુરુચિરાં સ્મેરાધરામેદુરામ્ ।
રક્ષન્તી નિજવલ્લભં નવઘનશ્યામાલિકેલિસ્થલી-
    પ્રોન્મીલન્કુચકોરકા વિજયતે પ્રાણાધિકા રાધિકા ॥ ૪૩ ॥

શ્રીમત્કોટિમનોભવૈર્વિજયતે યત્રાર્થસંવાદિની
    શ્રીમદ્ગાનવસન્તરાગવિલસદ્ વક્ત્રામ્બુજામોહિનીમ્ ।
line missing in the print
    શ્રીવૃન્દાવનવલ્લભા વિજયતે રાધા સુધામઞ્જરી ॥ ૪૪ ॥

કલાકુશલરઙ્ગિની નટતિ યત્ર રાધા નટી
    ન યત્ર મુરલીશ્રુતિપ્રિયસખો ભવેહાગપિ ।
યદીહ તરુપક્ષિણામનુભવોસ્તિ સઙ્ગ્રાહક-
    સ્સ્મરામિ યમુનાતટે રસિકવૃન્દવૃન્દાવનમ્ ॥ ૪૫ ॥

પ્રથમમિલિતભીતાઘ્રાયિતા સા સ્વરાશૌ
    પ્રિયતમભુજરાધાવ્યગ્રહસ્તૌ હસન્તૌ ।
અનમનમતિલીલાગદ્ગદોક્તેર્મદાન્ધૌ
    સ્મરનિભૃતનિકુઞ્જૌ રાધિકાકૃષ્ણચન્દ્રૌ ॥ ૪૬ ॥

હૃતકનકસુગૌરસ્નિગ્ધમેઘૌઘનીલ-
    ચ્છવિભિરખિલવૃન્દારણ્યમાર્ગે વ્રજન્તૌ ।
મૃદુલનવદુકૂલે નીલપીતે દધાનૌ
    સ્મરનિભૃતનિકુઞ્જૌ રાધિકાકૃષ્ણચન્દ્રૌ ॥ ૪૭ ॥

નવલલિતવપુષ્કૌ નવ્યલાવણ્યપુઞ્જૌ
    નવરસચલચિત્તૌ નૂતનપ્રેમવૃત્તૌ ।
નવનિધિવનલીલાકૌતુકેનાતિલોલૌ
    સ્મરનિભૃતનિકુઞ્જૌ રાધિકાકૃષ્ણચન્દ્રૌ ॥ ૪૮ ॥

નિખિલનિગમગૂઢૌ નિત્યમત્યન્તગૂઢૌ
    પ્રણતપરનિબદ્ધૌ શ‍ૃઙ્ખલાબદ્ધચેષ્ટૌ ।
સુરતરતિમદાન્ધૌ ન્યસ્તમિશ્રૌઘકન્દૌ
    સ્મરનિભૃતનિકુઞ્જૌ રાધિકાકૃષ્ણચન્દ્રૌ ॥ ૪૯ ॥

જઘનલુલિતવેણૂવિસ્ફુરદ્બર્હચૂડૌ
    રુચિરકનકચૂડાકઙ્કણદ્વન્દ્વપાણી ।

વિલસદરુણરોચિઃ પીતકૌશેયરમ્યૌ
    સ્મરનિભૃતનિકુઞ્જૌ રાધિકાકૃષ્ણચન્દ્રૌહ ॥ ૫૦॥

ગહનસુરતલીલાપાશસંસ્વિન્નગાત્રૌ
    દયિતનિજસખીભિર્વેધમાનૌ પટાન્તે ।
સુરતસુભુજવલ્લીપીડ્યમાનૌ ચ ભૂયઃ
    સ્મરનિભૃતનિકુઞ્જૌ રાધિકાકૃષ્ણચન્દ્રૌ ॥ ૫૧॥

વિલુલિતવરવેણીહારનાલાવતંસૌ
    મૃદુલમધુરહાસોલ્લાસવક્ત્રારવિન્દૌ ।
અતિરસમદનાન્ધૌ ચિત્રકન્દર્પકેલી-
    સ્મરનિભૃતનિકુલ્લૌ રાધિકાકૃષ્ણચન્દ્રૌ ॥ ૫૨॥

ઇતિ શ્રીરાધાકૃષ્ણપ્રાદુર્ભાવઃ સમ્પૂર્તિમગાત્ ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

From shrI sarasa stotrasangrahaH (Lucknow, 1909).

*Shri Radhakrishna PradurbhavaH*

pdf was typeset on August 22, 2020

Please send corrections to *sanskrit@cheerful.com*